# rAdhAShoDashanAmavarNanam

# રાધાષોડશનામવર્ણનમ્

## Document Information

Text title : raadhaaShodashanaamavarNam

File name : raadhaa16naarayaNa.itx

Category : devii, rAdhA, stotra, ShoDasha, devI

Location : doc_devii

Author : naarayaNa

Transliterated by : Daniel Mohanpersad

Proofread by : Daniel Mohanpersad

Source : brahmavaivarta puraaNa, shriinaaraayaNakRitam

Latest update : December 19, 2002

Send corrections to : danielmohanpersad98@msn.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# રાધાષોડશનામવર્ણનમ્

શ્રીનારાયણ ઉવાચ ।
રાધા રાસેશ્વરી રાસવાસિની રસિકેશ્વરી ।
કૃષ્ણપ્રાણાધિકા કૃષ્ણપ્રિયા કૃષ્ણસ્વરૂપિણી ॥ ૧॥

કૃષ્ણવામાઙ્ગસમ્ભૂતા પરમાનન્દરૂપિણી ।
કૃષ્ણા વૃન્દાવની વૃન્દા વૃન્દાવનવિનોદિની ॥ ૨॥

ચન્દ્રાવલી ચન્દ્રકાન્તા શતચન્દ્રપ્રભાનના ।
નામાન્યેતાનિ સારાણિ તેષામભ્યન્તરાણિ ચ ॥ ૩॥

રાધેત્યેવં ચ સંસિદ્ધૌ રાકારો દાનવાચકઃ ।
સ્વયં નિર્વાણદાત્રી યા સા રાધા પરિકીર્તિતા ॥ ૪॥

રાસેસેશ્વરસ્ય પત્નીયં તેન રાસેશ્વરી સ્મૃતા ।
રાસે ચ વાસો યસ્યાશ્ચ તેન સા રાસવાસિની ॥ ૫॥

સર્વાસાં રસિકાનાં ચ દેવીનામીશ્વરી પરા ।
પ્રવદન્તિ પુરા સન્તસ્તેન તાં રસિકેશ્વરીમ્ ॥ ૬॥

પ્રાણાધિકા પ્રેયસી સા કૃષ્ણસ્ય પરમાત્મનઃ ।
કૃષ્ણપ્રાણાધિકા સા ચ કૃષ્ણેન પરિકીર્તિતા ॥ ૭॥

કૃષ્ણાસ્યાતિપ્રિયા કાન્તા કૃષ્ણો વાસ્યાઃ પ્રિયઃ સદા ।
સર્વૈર્દેવગણૈરુક્તા તેન કૃષ્ણપ્રિયા સ્મૃતા ॥ ૮॥

કૃષ્ણરૂપં સંનિધાતું યા શક્તા ચાવલીલયા ।
સર્વાંશૈઃ કૃષ્ણસદૃશી તેન કૃષ્ણસ્વરૂપિણી ॥ ૯॥

વામાઙ્ગાર્ધેન કૃષ્ણસ્ય યા સમ્ભૂતા પરા સતી ।
કૃષ્ણવામાઙ્ગસમ્ભૂતા તેન કૃષ્ણેન કીર્તિતા ॥ ૧૦॥

પરમાનન્દરાશિશ્ચ સ્વયં મૂર્તિમતી સતી ।

શ્રુતિભિઃ કીર્તિતા તેન પરમાનન્દરૂપિણી ॥ ૧૧॥

કૃષિર્મોક્ષાર્થવચનો ન એતોત્કૃષ્ટવાચકઃ ।
આકારો દાતૃવચનસ્તેન કૃષ્ણા પ્રકીર્તિતા ॥ ૧૨॥

અસ્તિ વૃન્દાવનં યસ્યાસ્તેન વૃન્દાવની સ્મૃતા ।
વૃન્દાવનસ્યાધિદેવી તેન વાથ પ્રકીર્તિતા ॥ ૧૩॥

સઙ્ઘઃસખીનાં વૃન્દઃ સ્યાદકારોઽપ્યસ્તિવાચકઃ ।
સખિવૃન્દોઽસ્તિ યસ્યાશ્ચ સા વૃન્દા પરિકીર્તિતા ॥ ૧૪॥

વૃન્દાવને વિનોદશ્ચ સોઽસ્યા હ્યસ્તિ ચ તત્ર વૈ ।
વેદા વદન્તિ તાં તેન વૃન્દાવનવિનોદિનીમ્ ॥ ૧૫॥

નખચન્દ્રાવલી વક્ત્રચન્દ્રોઽસ્તિ યત્ર સંતતમ્ ।
તેન ચન્દ્રવલી સા ચ કૃષ્ણેન પરિકીર્તિતા ॥ ૧૬॥

કાન્તિરસ્તિ ચન્દ્રતુલ્યા સદા યસ્યા દિવાનિશમ્ ।
સા ચન્દ્રકાન્તા હર્ષેણ હરિણા પરિકીર્તિતા ॥ ૧૭॥

શરચ્ચન્દ્રપ્રભા યસ્સ્યાશ્ચાનનેઽસ્તિ દિવાનિશમ્ ।
મુનિના કીર્તીતા તેન શરચ્ચન્દ્રપ્રભાનના ॥ ૧૮॥

ઇદં ષોડશનામોક્તમર્થવ્યાખ્યાનસંયુતમ્ ॥

નારાયણેન યદ્દત્તં બ્રહ્મણે નાભિપઙ્કજે ।
બ્રહ્મણા ચ પુરા દત્તં ધર્માય જનકાય મે ॥ ૧૯॥

ધર્મેણ કૃપયા દત્તં મહ્યમાદિત્યપર્વણિ ।
પુષ્કરે ચ મહાતીર્થે પુણ્યાહે દેવસંસદિ ॥

રાધાપ્રભાવપ્રસ્તાવે સુપ્રસન્નેન ચેતસા ॥ ૨૦॥

ઇદં સ્તોત્રં મહાપુણ્યં તુભ્યં દત્તં મયા મુને ।
નિન્દકાયાવૈષ્ણવાય ન દાતવ્યં મહામુને ॥ ૨૧॥

યાવજ્જીવમિદં સ્તોત્રં ત્રિસંધ્યં યઃ પઠેન્નરઃ ।
રાધામાધવયોઃ પાદપદ્મે ભક્તિર્ભવેદિહ ॥ ૨૨॥

અન્તે લભેત્તયોર્દાસ્યં શશ્વત્સહચરો ભવેત્ ।
અણિમાદિકસિધિં ચ સમ્પ્રાપ્ય નિત્યવિગ્રહમ્ ॥ ૨૩॥

વ્રતદાનોપવાઇશ્ચ સર્વૈર્નિયમપૂર્વકૈઃ ।
ચતુર્ણાં ચૈવ વેદાનાં પાઠૈઃ સર્વાર્થસંયુતૈઃ ॥ ૨૪॥

સર્વેષાં યજ્ઞતીર્થાનાં કરણૈર્વિધિવોધિતઃ ।
પ્રદક્ષિણેન ભુમેશ્ચ કૃત્સ્નાયા એવ સપ્તધા ॥ ૨૫॥

શરણાગતરક્ષાયામજ્ઞાનાં જ્ઞાનદાનતઃ ।
દેવાનાં વૈષ્ણવાનાં ચ દર્શનેનાપિ યત્ ફલમ્ ॥ ૨૬॥

તદેવ સ્તોત્રપાઠસ્ય કલાં નાર્હતિ ષોડશીમ્ ।
સ્તોત્રસ્યાસ્ય પ્રભાવેણ જીવન્મુક્તો ભવેન્નરઃ ॥ ૨૭॥

ઇતિ શ્રીબ્રહ્મવૈવર્તે શ્રીનારાયણકૃતં રાધાષોડશનામ વર્ણનમ્ ॥

Encoded by Daniel Mohanpersad danielmohanpersad98@msn.com

*rAdhAShoDashanAmavarNanam*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*